International Journal of Research in Social Sciences
Vol. 11 Issue 03, March 2021
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# अहं संस्कृतशिक्षकः ?!।

**डा. डम्बरुध्रपतिः**
सहायकाचार्यः
शिक्षाविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
भोपालपरिसरः, भोपालम्

## प्रस्तावना–

अखिलभारते संस्कृतस्य पठनपाठनाय औपचारिकसंस्थाः अनौपचारिकसंस्थाः च विद्यन्ते। यत्रा छात्राः पठन्ति शिक्षकाः पाठयन्ति च। संस्कृतसंस्थासु पठनपाठनपरम्परायां गुणात्मकता आवश्यकीति विद्वांसः वदन्तः भवन्ति। पठने पाठने च गुणत्मकता आवश्यकी इति वाक्यं पठित्वा जिज्ञासा उत्पद्यते। छात्राः तु पठितुमागच्छन्ति तथा शिक्षकाः पाठयन्ति चेति शिक्षापरम्परायाः अयं लोकसम्प्रत्ययः। परं वास्तविकरूपेण पश्यामश्चेत् पठनकार्यं प्रथमतः शिक्षकस्य स्यात्। शिक्षकः चिन्तयन्ति कार्यं मे पाठनं खलु? तथा न। पाठनं तदा सफलं भविष्यति यदा शिक्षकः पठनं सम्यक् करिष्यति। प्रत्येकं प्रकरणं विश्लेषणात्मकरीत्या संश्लेषणात्मकरीत्या च यदा शिक्षकः पठिष्यति तदा पाठने सः समर्थः भविष्यति। अत्र पठनपाठनपरम्परायामपि एका जिज्ञासा आगच्छति। किं प्रकरणस्य पाठने केवलं प्रकरणज्ञानं तथा प्रकरणे स्थितवाक्यानां शब्दार्थज्ञानं वा अपेक्ष्यते ? यदि सूक्ष्मदृष्ट्या विचारयामश्चेत् तर्हि प्रकरणस्य शब्दार्थज्ञानेन सह बालकस्य भाविजीवनेन सह तस्य प्रकरणस्य कः सम्बधः? इति चिन्तनमावश्यकम्। तत् प्रकरणं किमर्थं बालकं पाठयामः? तथैव प्रत्येकं प्रकरणविषये शिक्षकाः चिन्तनं कुर्युः। शिक्षकाः एव राष्ट्रस्य निर्मातरः इति समे जानन्ति। अध्यापनेन सह राष्ट्रस्य सम्बन्धविषये यदा चिन्तयामः तदा पठनपाठनपरम्परा आगच्छति। कक्षया सह राष्ट्रस्य सम्बन्धः तदा सम्भाव्यते यदा तस्यां कक्षायां शिक्षकः राष्ट्रानुकूलं जीवनानुकूलं वा प्रकरणं पाठयिष्यति। प्रकरणं केवलं परीक्षायाः कृते न भवति। जीवनेन सह सम्बन्धो भवेत्। अतः सेवापूर्वप्रशिक्षणकाले सेवारतप्रशिक्षणकाले च समाजशास्त्रस्य अध्यापनं क्रियते। कक्षायां सामाजिकोत्तरदायित्वविषये ज्ञानमावश्यकम्। पाठस्य सम्बन्धः समाजेन सह स्थापनीयः ।

एकस्य संस्कृतशिक्षकस्य दायित्वम् अधिकम् अस्ति। कक्षायां केवलं प्रकरणं न पाठयिष्यति अपितु समाजस्य प्रतिनिधिरूपेण मार्गदर्शनं कारयिष्यति।

**शोधलेखविश्लेषणम्–**

अहं संस्कृतशिक्षक इति गर्वेण वदामि, उत उद्योगं करोमि तदर्थं वदामीति प्रसंगः। ''अहं संस्कृतशिक्षकः?!।'' शोधलेखस्य प्रकरणे चिह्नत्रयं विद्यते। प्रथमचिह्नं प्रश्नवाचकरूपेण स्वीक्रियते द्वितीयं विस्मयवाचकरूपेण तृतीयं च विरामचिह्नरूपेण विद्यते। यदि चिह्नानुसारं प्रकरणं स्पष्टं कुर्मश्चेत् तर्हि निम्नलिखितवाक्यानि भविष्यन्तीति मे मतिः।

? – अहं संस्कृतशिक्षको वा ? किम् अहं संस्कृतशिक्षकः ?

! – अहो अहं संस्कृतशिक्षकः !

। – आम्, अहं संस्कृतशिक्षकः।




अस्मिन् चित्रे संस्कृतशिक्षकः कुत्र अस्ति इति चिन्तयेत्।

प्रत्येकं चिह्नस्य उद्देश्यमस्ति। संस्कृताध्यापकस्य कृते एव चिह्नानि भवन्ति। प्रत्येकं संस्कृतशिक्षकः त्रिषु चिह्नेषु कुत्र अस्तीति विचारः करणीयः। सम्प्रति चिह्नानुसारं किम् उद्देश्यं किं वा लक्ष्यम् इति ज्ञास्यामः।

1. ? – अहं संस्कृतशिक्षको वा ? किम् अहं संस्कृतशिक्षकः ?

अस्मिन् प्रसंगे शोधलेखकस्य मुख्योद्देश्यमस्ति यत्– संस्कृतशिक्षकस्य यत् दायित्वमस्ति, किं संस्कृतशिक्षकः तत् दायित्वं निर्वहति ? कक्षया सह समाजे संस्कृतशिक्षकस्य यत्

कर्त्तव्यमस्ति तत् करोति वा? यथा पुत्रस्य कृते चिन्तितं भवति तथैव छात्रस्य कृते भवति वा? इति अनेन प्रकारेण प्रत्येकं संस्कृतशिक्षकः वैयक्तिकरूपेण चिन्तयेत्। सर्वम् अनुपालयति चेत् तर्हि प्रश्नवाचके चिह्ने सः शिक्षकः न भविष्यतीति मे मतिः।

2. ! – अहो अहं संस्कृतशिक्षकः !

संस्कृतशिक्षकः उद्योगं प्राप्नोति। प्रायशः येन केन प्रकारेण शिक्षणव्यवसायं चालयति। संस्कृतशिक्षकः मध्ये मध्ये शिक्षणधिगमप्रक्रियायाः तत्त्वं पठित्वा हृदि आश्चर्यभावनाम् उत्पादयति। संस्कृतशिक्षकाः किं किं कुर्युः? किं वा उत्तरदायित्वं स्यात्? इत्यस्मिन् विषये ज्ञानं न भवति चेत् आजीवनम् आश्चर्यभावनायां भविष्यति। शिक्षकः भविष्यति परं शिक्षकत्वम् अभिज्ञातुं असमर्थः भविष्यति। केवलं कालांशं न यापयामः अपितु छात्राणां जीवनमूल्यानां विकासः कथं भविष्यतीति सर्वदा चिन्तयामः।

3. । – आम्, अहं संस्कृतशिक्षकः।

यदा एकः संस्कृतशिक्षकः सर्वं दायित्वं निर्वहति तदा छात्रान् जीवनं प्रति, समाजं प्रति राष्ट्रं प्रति च प्रेरयितुं समर्थः भविष्यति। तदा सः शिक्षकः गर्वेण ''अहं संस्कृतशिक्षकः।'' इति वक्तुं शक्नोति। अहं संस्कृतशिक्षकः इति गर्वेण शिक्षकः सर्वदा वदेत् अनुकुर्याच्च। ''अहं संस्कृतशिक्षकः'' इति पदं साधयितुं 20 बिन्दूनां ज्ञानमावश्यकमिति मे मतिः।

1. संस्कृतसंस्कारः
2. संस्कृताभिरुचिः
3. शिष्यदेवो भव
4. भारतीयशिक्षेतिहासे प्रौढत्वम्
5. संस्कृतसाहित्येतिहासे दक्षता
6. व्यावहारिकव्याकरणज्ञानम्
7. आदर्शशिक्षकः
8. कक्षायां समभावप्रदर्शनम्
9. संस्कृतविषये क्षमता
10. नवाचाराणां ज्ञानं प्रयोगश्च
11. सामाजिकनेता
12. समयानुवर्तिता

13. पाठ्यसहगामिक्रियासु दक्षता
14. दर्शनशास्त्रे अभिरुचिः
15. मनोवैज्ञानिकतत्त्वानां प्रयोगः
16. शिक्षणकौशलेषु निपुणता
17. कक्षाप्रबन्धने क्षमता
18. संस्कृतवातावरणस्य निर्माता
19. समसामयिकपरामर्शदाता
20. अनुसन्धाता च।

एतेषां विस्तृतविश्लेषणं पुस्तके भवति। शोधलेखे सारांशं लिखामि।

1. संस्कृतसंस्कारः– संस्कृतशिक्षकस्य रक्ते, मनसि आत्मसु च संस्कृतं स्यात्। संस्कृताय स्वप्नः अपि पश्येत्। यथा संस्कृतशिक्षकः स्वस्य परिवारस्य च कृते किमपिकार्यं निष्ठया करोति तथैव संस्कृताय कुर्यादित्यर्थः। संसकृतज्ञानपरम्परायाः अनुकरणम् आचरणं च सततं कुर्यात्। परिचयं विना अपि जनाः यदा कमपि संस्कृतशिक्षकम् ''अयं संस्कृतशिक्षकः'' इति कथयिष्यन्ति तदा शिक्षके संस्कृतसंस्कार अस्ति इति ज्ञास्यते।
2. संस्कृताभिरुचिः– प्रथमतः शिक्षकस्य संस्कृतं प्रति रुचिः स्यात्। अभिभाषणे अन्यान् जनान् केवलम् प्रेरयामः तथा न। यान् प्रेरयामः यदि सः सदा तमं शिक्षकं पश्यति तर्हि सः तथैव व्यवहरति। अतः संस्कृतशिक्षके संस्कृतं प्रति रुचिः स्यात्।
3. शिष्यदेवो भव– गुरुशिष्ययोः मध्ये सम्बन्धः पुत्रवत् भवेत्। महाभारते निगदितमस्ति–

   पुत्रादनन्तरं शिष्य इति धर्मविदो विदुः।
   एतेनापि निमित्तेन प्रियो द्रोणस्य पाण्डवः।। महा.विराट 50/21

   कक्षाशिक्षणस्य मुख्योद्देश्यम् अधिगमः सम्यक् भवतु इति। कक्षायां प्रत्येकं छात्रस्य अधिगमः स्यात्। अतः छात्राधिगमनाय शिक्षकाः छात्रान् ज्ञातुम् समर्थाः स्युः। लोकेऽपि कथ्यते बालेषु देवत्वम् अस्ति। यदि शिक्षणं व्यवसायमिति शिक्षकः चिन्तयति तर्हि आंग्लभाषायां ब्वेजनउमत पे ळवक (बोधाय उदाहरणमिदम्) इति उक्तमस्ति। अतः कक्षायां सः छात्रः अस्माकं देवः भवति। यदि शिक्षकः प्रत्येकं छात्रं स्नेहं करिष्यति, छात्रानुकूलं पाठयिष्यति छात्रम् अभिज्ञातुं प्रयासं करिष्यति तर्हि

छात्रा अपि अध्यापकान् श्रद्धां करिष्यन्ति। येन आचार्यदेवो भव इति वेदवाक्यं सिद्धं भविष्यति।

4. भारतीयशिक्षेतिहासे प्रौढत्वम्– प्रकरणज्ञानेन सह प्रसंगात्मकज्ञानम् उदाहरणं च कक्षायां वक्तव्यम्। अनेन पाठः सरलः भवति। अतः प्रसंगात्मकज्ञानं प्राप्तुं अवबोधनानुकूलम् उदाहरणं वक्तुं भारतीयशिक्षेतिहासे प्रौढत्वम् आवश्यकम्।
5. संस्कृतसाहित्येतिहासे दक्षता– संस्कृतसाहित्येतिहासस्य अध्ययनं संस्कृतशिक्षकस्य प्रथमदायित्वं भवति। येन संस्कृतपाठने तस्य दक्षता आगच्छति।
6. व्यावहारिकव्याकरणज्ञानम्–सैद्धान्तिकज्ञानेन सह व्यावहारिकज्ञानमपि अपेक्ष्यते। प्रत्येकं सूत्रस्य प्रायोगिकज्ञानमावश्यकम्। जीवनसम्बन्धीयोदाहरणेन सह व्याकरणं पठेत् पाठयेच्च। छात्रानुकूलम् उदाहरणं प्रस्तूय व्याकरणं पाठयेत्। छात्रस्य शब्दसंस्कारेण सह वाक्यसंस्कारेण सह च व्याकरणस्य संम्बन्धं स्थापयित्वा पाठयेत्।
7. आदर्शशिक्षकः– यदि एकस्य संस्कृतशिक्षकस्य कृते प्रश्नः क्रियते यत्– भवतां जीवने आदर्शशिक्षकः कः? इति। सहर्षेण संस्कृतशिक्षकस्य उत्तरमागच्छति। अतः संस्कृतशिक्षकस्य यः आदर्शशिक्षको भवति यदि तस्य गुणान् विवेचयामः तर्हि सः संस्कृतशिक्षकः अपि आनन्देन सर्वं प्रस्तौति। अत्र जिज्ञासा आगच्छति , यथा आदर्शशिक्षकस्य गुणाः संस्कृतशिक्षकस्य शिक्षके अस्ति, किं तथैव संस्कृतशिक्षके ते गुणाः नावश्यकाः वा? संस्कृतशिक्षकस्य छात्राः अपि उत्तरोत्तरकाले मम संस्कृतशिक्षकः आदर्शशिकः इति गर्वेण वक्तु समर्थाः भवेयुः। तदनु अस्मासु आदर्शशिक्षकस्य गुणाः स्युः।
8. कक्षायां समभावप्रदर्शनम्–प्रायशः कक्षायाम् अग्रे ये छात्राः उपविशन्ति, शिक्षकाः तान् अधिकाधिकान् सम्बोधयन्ति। अन्ये छात्राः वचिंताः भवन्ति। प्रत्येकं छात्रस्य उपरि समभावं प्रकटयामः।
9. संस्कृतविषये क्षमता– पाठितेन प्रकरणेन सह प्रकरणसम्बन्धीयजीवनज्ञानमावश्यकमित्यर्थः। अतः भारतीयेतिहासस्य संस्कृतसाहित्यस्य तथा भरतीयसंस्कृतेः अध्ययनं कुर्यात्।
10. नवाचाराणां ज्ञानं प्रयोगश्च– आधुनिकयन्त्राणां तन्त्राणां च विषये प्रयोगात्मकज्ञानं स्यात्। संस्कृतस्य प्रयोगं तस्मिन् यन्त्रे तन्त्रे च कृत्वा छात्रान् सरलतया पाठयामः।

11. सामाजिकनेता– कक्षया सह सामाजिकोत्तरदायित्वस्य अवबोधनं संस्कृतशिक्षकस्य भवेत्। प्रेरणया सह सामाजिक क्षेत्रे स्वस्यापि कार्यं सततं संचलेत्।
12. समयानुवर्तिता–समयानुसारं प्रत्येकं कार्यं कुर्यात्। समयस्य सदुपयोगं कृत्वा अन्यान् प्रेरयेत्।
13. पाठ्यसहगामिक्रियासु दक्षता–शिक्षकेषु संस्कृतपाठ्यसहगामिविषयाणां ज्ञानं स्यात्। वादविवाद–वाक्स्पर्धा–अक्षरश्लोकी–निबन्धलेखन–संगोष्ठी–कथालेखन–समस्यापूर्ति –गान–विनोदकणिका–प्रहेलिका–कथाकथन–प्रदर्शिनी–स्फूर्तिस्पर्धा–विद्यालयपत्रिका –भाषाक्रीडादिषु दक्षता स्यात्।
14. दर्शनशास्त्रे अभिरुचिः– शिक्षकः एकः दार्शनिकः स्यात्। छात्राणाम् आन्तरिकचिन्तनं बाह्यचिन्तनं च दृष्ट्वा पाठनीयम्।
15. मनोवैज्ञानिकतत्त्वानां प्रयोगः–कक्षायां बहिः वा छात्राणां मानसिकपरिस्थिते अध्ययनं कृत्वा छात्रान् प्रेरयेत्।
16. शिक्षणकौशलेषु निपुणता–अधीतज्ञानस्य प्रस्तुतीकरणस्य ज्ञानं स्यात्। प्रत्येकं पाठे छात्रान् सरलात् कठिनं प्रति नयामः। प्रकरणे स्थितजीवनमूल्यविषयकं ज्ञानं दद्मः।
17. कक्षाप्रबन्धने क्षमता–पाठनेन सह कक्षानुशासने दक्षाः स्युः। छात्राणां पाठं प्रति रुचिवर्धनं स्यात् तदनु कक्षाप्रबन्धनक्षमता आवश्यकी।
18. संस्कृतवातावरणस्य निर्माता–कक्षया सह समाजे स्वगृहे चापि संस्कृतवातावरणं स्थापनीयम्।
19. समसामयिकपरामर्शदाता–संस्कृतच्छात्राः संस्कृतं पठित्वा अग्रे किं किं करिष्यन्ति? के के अवसराः सन्ति? च एतस्मिन् विषये सदा परामर्शः दातव्यः। सफलजीवननिर्माणाय परामर्शदातृरूपेण संस्कृतशिक्षकस्य आवश्यकता अस्ति।
20. अनुसन्धाता–प्रत्येकं समये प्रत्येकं विषयस्य उपरि सूक्ष्मदृष्टिः तथा अनुसन्धानात्मकदृष्टिः संस्कृतशिक्षकस्य स्यात्। प्रत्येकं विषये किं? कथं? किमर्थम्? इत्य चादिषु विचारः करणीयः।

प्रत्येकं सोपानम् एकः अध्यायः अस्ति। पुस्तके विस्तृतवर्णनं भवति।

निष्कर्षः परामर्शश्च–

संस्कृतशिक्षकः तदा आत्मानं बोधयिष्यति यदा सः संस्कृतं प्रति आन्तरिकाभिरुचिं स्थापयिष्यति। प्रत्येकं प्रकरणं दृष्ट्या प्रसंगानुकूलं ज्ञानमावश्यकम्। मनसा, वचसा कर्मणा च संस्कृतप्रीतिः भवेत्। समाजस्य प्रतिनिधिरूपेण उत्तरदायित्वं बोधयेत्। समसामयिकज्ञानमपि दातव्यम्। भारतीयशिक्षेतिहासं पठित्वा तुलनात्मकाध्ययनरीत्या पाठयेत्। नवाचाराणां ज्ञानं तदनु तस्य प्रयोगमपि कुर्यात्। कक्षाप्रबन्धनेन सह सामाजिकप्रबन्धनज्ञानमपि आवश्यकम्।

अनेन प्रकारेण संस्कृतशिक्षकः यदि प्रत्येकं पक्षं दृष्ट्वा कार्यं करिष्यति चेत् तर्हि सः गर्वेण ''अहं संस्कृतशिक्षकः।'' इति वक्तुं समर्थः भविष्यति।

अनुशीलितग्रन्थः

1. पुरोहित जगदीश नारायण, व्यास हरिश्चन्द्र एवं शर्मा मुरली मनोहर (2008)– भावी शिक्षकों के लिए आधारभूत कार्यक्रम, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर।
2. पाण्डेय, डा.रामशकल–(2008) उदीयमान भारतीय समाज में शिक्षक–अग्रवाल पब्लिकेशन्स, आगरा–7।
3. झा, डा.मदनमोहन–(2007) अध्यापनमार्गदर्शिका–श्रुतिप्रकाशनम्, पुरी।
4. पात्रा, डा.वृन्दावन(2008) शिक्षणस्य वैज्ञानिकाधारः–अनन्ताक्षरप्रकाशनम्।
5. पति, डा. डम्बरुधर–(2015) शैक्षिकचिन्तनम्–रचना प्रकाशन, जयपुर।
6. पाठक पी.डी.–(2009) भारतीय शिक्षा और उसकी समस्याएँ–श्री विनोद पुस्तक मन्दिर, आगरा–2।